ब्रह्ममुरारि सुरार्चित लिङ्गं  निर्मल भासित शोभित लिङ्गम् ।

जन्मज दुःख विनाशक लिङ्गं तत्-प्रणमामि सदाशिव लिङ्गम् ॥ 1 ॥

ப்ரஹ்மமுராரி ஸுரார்சித லிங்க3ம்

நிர்மலபா4ஸித ஶோபி4த லிங்க3ம் |

ஜன்மஜ து3:க வினாஶக லிங்க3ம்

தத்-ப்ரணமாமி ஸதா3ஶிவ லிங்க3ம் || 1 ||

देवमुनि प्रवरार्चित लिङ्गं कामदहं करुणाकर लिङ्गम् ।

रावण दर्प विनाशन लिङ्गं तत् प्रणमामि सदाशिवलिङ्गम् ॥२॥

தே3வமுனி ப்ரவரார்சித லிங்க3ம்

காமத3ஹம் கருணாகர லிங்க3ம் |

ராவண த3ர்ப வினாஶன லிங்க3ம்

தத்-ப்ரணமாமி ஸதா3ஶிவ லிங்க3ம் || 2 ||

सर्व सुगन्ध सुलेपित लिङ्गं बुद्धि विवर्धन कारण लिङ्गम् ।

सिद्ध सुरासुर वन्दित लिङ्गं तत् प्रणमामि सदाशिव लिङ्गम् ॥३॥

ஸர்வ ஸுக3ந்த4 ஸுலேபித லிங்க3ம்

பு3த்3தி4 விவர்த4ன காரண லிங்க3ம் |

ஸித்3த4  ஸுராஸுர வந்தி3த லிங்க3ம்

தத்-ப்ரணமாமி ஸதா3ஶிவ லிங்க3ம் || 3 ||

कनक महामणि भूषित लिङ्गं फणिपति वेष्टित शोभित लिङ्गम् ।

दक्ष सुयज्ञ विनाशन लिङ्गं तत् प्रणमामि सदाशिव लिङ्गम् ॥४॥

கனக மஹாமணி பூ4ஷித லிங்க3ம்

ப2ணிபதி வேஷ்டித ஶோபி4த லிங்க3ம் |

த3க்ஷ ஸுயஜ்ஞ வினாஶன லிங்க3ம்

தத்-ப்ரணமாமி ஸதா3ஶிவ லிங்க3ம் || 4 ||

कुङ्कुम चन्दन लेपित लिङ्गं पङ्कज हार सुशोभित लिङ्गम् ।

सञ्चित पाप विनाशन लिङ्गं तत् प्रणमामि सदाशिवलिङ्गम् ॥५॥

குங்கும சந்த3ன லேபித லிங்க3ம்
பங்கஜ ஹார ஸுஶோபி4த லிங்க3ம் |
ஸஞ்சித பாப வினாஶன லிங்க3ம்
தத்-ப்ரணமாமி ஸதா3ஶிவ லிங்க3ம் || 5 ||

देवगणार्चित सेवित लिङ्गं भावैर्भक्तिभिरेव च लिङ्गम् ।

दिनकर कोटि प्रभाकर लिङ्गं तत् प्रणमामि सदाशिव लिङ्गम् ॥६॥

தே3வகணார்சித ஸேவித லிங்க3ம்
பா4வைர் ப4க்தி பி4ரேவ ச லிங்க3ம் |
தினகர கோடி ப்ரபாகர லிங்க3ம்
தத்-ப்ரணமாமி ஸதா3ஶிவ லிங்க3ம் || 6 ||

अष्टदलोपरिवेष्टित लिङ्गं सर्व समुद्भव कारण लिङ्गम् ।

अष्ट दरिद्र विनाशन लिङ्गं तत् प्रणमामि सदाशिव लिङ्गम् ॥७॥

அஷ்டத3ளோபரிவேஷ்டித லிங்க3ம்
ஸர்வ ஸமுத்ப4வ காரண லிங்க3ம் |
அஷ்டத3ரித்ர வினாஶன லிங்க3ம்
தத்-ப்ரணமாமி ஸதா3ஶிவ லிங்க3ம் || 7 ||

सुरगुरु सुरवर पूजित लिङ्गं सुरवन पुष्प सदार्चित लिङ्गम् ।

परात्परं परमात्मक लिङ्गं तत् प्रणमामि सदाशिव लिङ्गम् ॥८॥

ஸுரகு3ரு ஸுரவர பூஜித லிங்க3ம்
ஸுரவன புஷ்ப ஸதா3ர்சித லிங்க3ம் |
பராத்பரம் பரமாத்மக லிங்க3ம்
தத்-ப்ரணமாமி ஸதா3ஶிவ லிங்க3ம் || 8 ||

लिङ्गाष्टकमिदं पुण्यं यः पठेत् शिवसन्निधौ ।

शिवलोकमवाप्नोति शिवेन सह मोदते ॥

லிங்கா3ஷ்டகமித3ம் புண்யம் யஃ படே2த் ஶிவ ஸன்னிதௌ4 |

ஶிவலோகமவாப்னோதி ஶிவேன ஸஹ மோத3தே ||